# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय ५९

अथ रात्र्यां प्रवृत्तायां शत्रुघ्नो भृगुनन्दनम् ।
पप्रच्छ च्यवनं विप्रं लवणस्य बलाबलम् ॥ १॥

शूलस्य च बलं ब्रह्मन्के च पूर्वं निपातिताः ।
अनेन शूलमुखेन द्वन्द्वयुद्धमुपागताः ॥ २॥

तस्य तद्भाषितं श्रुत्वा शत्रुघ्नस्य महात्मनः ।
प्रत्युवाच महातेजाश् च्यवनो रघुनन्दनम् ॥ ३॥

असङ्ख्येयानि कर्माणि यान्यस्य पुरुषर्षभ ।
इक्ष्वाकुवंशप्रभवे यद्वृत्तं तच्छृणुष्व मे ॥ ४॥

अयोध्यायां पुरा राजा युवनाश्वसुतो बली ।
मान्धता इति विख्यातस्त्रिषु लोकेषु वीर्यवान् ॥ ५॥

स कृत्वा पृथिवीं कृत्स्नां शासने पृथिवीपतिः ।
सुरलोकमथो जेतुमुद्योगमकरोन्नृपः ॥ ६॥

इन्द्रस्य तु भयं तीव्रं सुराणां च महात्मनाम् ।
मान्धातरि कृतोद्योगे देवलोकजिगीषया ॥ ७॥

अर्धासनेन शक्रस्य राज्यार्धेन च पार्थिवः ।
वन्द्यमानः सुरगणैः प्रतिज्ञाम् अध्यरोहत ॥ ८॥

तस्य पापमभिप्रायं विदित्वा पाकशासनः ।
सान्त्वपूर्वमिदं वाक्यमुवाच युवनाश्वजम् ॥ ९॥

राजा त्वं मानुषं लोके न तावत्पुरुषर्षभ ।
अकृत्वा पृथिवीं वश्यां देवराज्यमिहेच्छसि ॥ १०॥

यदि वीर समग्रा ते मेदिनी निखिला वशे ।
देवराज्यं कुरुष्वेह सभृत्यबलवाहनः ॥ ११॥

इन्द्रमेवं ब्रुवाणं तु मान्धाता वाक्यमब्रवीत् ।
क्व मे शक्रप्रतिहतं शासनं पृथिवीतले ॥ १२॥

तमुवाच सहस्राक्षो लवणो नाम राक्षसः ।
मधुपुत्रो मधुवने नाज्ञां ते कुरुतेऽनघ ॥ १३॥

तच्छ्रुत्वा विप्रियं घोरं सहस्राक्षेण भाषितम् ।
व्रीडितोऽवाङ्मुखो राजा व्याहर्तुं न शशाक ह ॥ १४॥

आमन्त्र्य तु सहस्राक्षं ह्रिया किं चिदवाङ्मुखः ।
पुनरेवागमच्छ्रीमानिमं लोकं नरेश्वरः ॥ १५॥

स कृत्वा हृदयेऽमर्षं सभृत्यबलवाहनः ।
आजगाम मधोः पुत्रं वशे कर्तुमनिन्दितः ॥ १६॥

स काङ्क्षमाणो लवणं युद्धाय पुरुषर्षभः ।
दूतं सम्प्रेषयामास सकाशं लवणस्य सः ॥ १७॥

स गत्वा विप्रियाण्याह बहूनि मधुनः सुतम् ।
वदन्तमेवं तं दूतं भक्षयामास राक्षसः ॥ १८॥

चिरायमाणे दूते तु राजा क्रोधसमन्वितः ।
अर्दयामास तद्रक्षः शरवृष्ट्या समन्ततः ॥ १९॥

ततः प्रहस्य लवणः शूलं जग्राह पाणिना ।
वधाय सानुबन्धस्य मुमोचायुधमुत्तमम् ॥ २०॥

तच्छूलं दीप्यमानं तु सभृत्यबलवाहनम् ।
भस्मीकृत्य नृपं भूयो लवणस्यागमत्करम् ॥ २१॥

एवं स राजा सुमहान्हतः सबलवाहनः ।
शूलस्य च बलं वीर अप्रमेयमनुत्तमम् ॥ २२॥

श्वः प्रभाते तु लवणं वधिष्यसि न संशयः ।
अगृहीतायुधं क्षिप्रं ध्रुवो हि विजयस्तव ॥ २३॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for

his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com